# ॥ सप्तमोऽध्यायः ॥

ध्यानं
ॐ ध्यायेयं रत्न पीठे शुककल पठितं श्रुण्वतीं श्यामलाङ्गीं ।
न्यस्तैकाङ्घ्रिं सरोजे शशि शकल धरां वल्लकीं वादयन्तीं ॥
कह्लाराबद्ध मालां नियमित विलसच्चोलिकां रक्त वस्त्रां ।
मातङ्गीं शङ्ख पात्रां मधुर मधुमदां चित्रकोद्भासि भालां ॥

ॐ ऋषिरुवाच ॥ १॥

आज्ञप्तास्ते ततो दैत्या श्चण्डमुण्ड पुरोगमाः ।
चतुरङ्ग बलोपेता ययुर भ्युद्यता युधाः ॥ २॥

ददृशुस्ते ततो देवीं ईषद्धासां व्यवस्थिताम् ।
सिंहस्योपरि शैलेन्द्र शृङ्गे महति काञ्चने ॥ ३॥

ते दृष्ट्वा तां समादातुं उद्यमं चक्रुरुद्यताः ।
आकृष्ट चापासिधरा स्तथान्ये तत्समीपगाः ॥ ४॥

ततः कोपं चकारोच्चैर् अम्बिका तानरीन्प्रति ।
कोपेन चास्या वदनं मषीवर्ण मभूत्तदा ॥ ५॥

भ्रुकुटी कुटिलात्तस्या ललाट फलकादद्द्रुतम् ।
काली कराल वदना विनिष्क्रान्तासि पाशिनी ॥ ६॥

विचित्र खट्वाङ्ग धरा नरमाला विभूषणा ।
द्वीपिचर्म परीधाना शुष्क मांसाति भैरवा ॥ ७॥

अतिविस्तार वदना जिह्वा ललन भीषणा ।
निमग्ना रक्त नयना नादापूरित दिङ्मुखा ॥ ८॥

सा वेगेनाभिपतिता घातयन्ती महासुरान् ।
सैन्ये तत्र सुरारीणां अभक्षयत तद्बलम् ॥ ९॥

पार्ष्णि ग्राहाङ्कुश ग्राहि योध घण्टा समन्वितान् ।
समादायैक हस्तेन मुखे चिक्षेप वारणान् ॥ १०॥

तथैव योधं तुरगै रथं सारथिना सह ।
निक्षिप्य वक्त्रे दशनैश् चर्वयन्त्यति भैरवम् ॥ ११॥

एकं जग्राह केशेषु ग्रीवायामथ चापरम् ।
पादेनाक्रम्य चैवान्य मुरसान्य मपोथयत् ॥ १२॥

तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः ।
मुखेन जग्राह रुषा दशनै र्मथितान्यपि ॥ १३॥

बलिनां तद्बलं सर्वं असुराणां दुरात्मनाम् ।
ममर्दा भक्षयच्चान्यान् अन्यांश्चा ताडयत्तदा ॥ १४॥

असिना निहताः केचित् केचित्खट्वाङ्ग ताडिताः ।
जग्मु र्विनाश मसुरा दन्ताग्राभिहता स्तथा ॥ १५॥

क्षणेन तद्बलं सर्वं असुराणां निपातितम् ।
दृष्ट्वा चण्डोऽभिदुद्राव तां काली मतिभीषणाम् ॥ १६॥

शरवर्षै र्महाभीमै र्भीमाक्षीं तां महासुरः ।
छादयामास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः ॥ १७॥

तानि चक्राण्यनेकानि विशमानानि तन्मुखम् ।
बभुर्यथार्क बिम्बानि सुबहूनि घनोदरम् ॥ १८॥

ततो जहासातिरुषा भीमं भैरव नादिनी ।
काली कराल वक्त्रान्तर् दुर्दर्श दशनोज्ज्वला ॥ १९॥

उत्थाय च महासिंहं देवी चण्ड मधावत ।
गृहीत्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत् ॥ २०॥

अथ मुण्डोऽभ्य धावत्तां दृष्ट्वा चण्डं निपातितम् ।
तमप्यपातयद्भूमौ सा खड्गाभि हतं रुषा ॥ २१॥

हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितम् ।
मुण्डं च सुमहावीर्यं दिशो भेजे भयातुरम् ॥ २२॥

शिरश्चण्डस्य काली च गृहीत्वा मुण्डमेव च ।
प्राह प्रचण्डाट्टहास मिश्रमभ्येत्य चण्डिकाम् ॥ २३॥

मया तवात्रो पहृतौ चण्डमुण्डौ महापशू ।

युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि ॥ २४॥

ऋषिरुवाच ॥ २५॥
तावानीतौ ततो दृष्ट्वा चण्डमुण्डौ महासुरौ ।
उवाच कालीं कल्याणी ललितं चण्डिका वचः ॥ २६॥

यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता ।
चामुण्डेति ततो लोके ख्याता देवी भविष्यसि ॥ २७॥

॥ इति श्रीमार्कण्डेय पुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
चण्ड मुण्ड वधो नाम सप्तमोऽध्यायः ॥ ७॥